वार्षिक–पाठ्यक्रमः कक्षा –षष्ठी

सत्रम्– 2024-25 विषयः–संस्कृतम्

| पाठ्यवस्तु | सहायकशैक्षिक–अनुदेशाः | अधिगम–उद्देश्यानि | अधिगमसम्प्राप्तयः | गतिविधयः |
|---|---|---|---|---|
| शब्दपरिचयः - I | चित्रमाध्यमेन शब्दपरिचयः - चषकः, सौचिकः, शुनकः इत्यादीनां प्रथमाविभक्तौ त्रिषु वचनेषु अभ्यासः।<br>अभिनयमाध्यमेन सर्वनामपरिचयः – एतत्, तत्, किम् इति एतेषां पुल्लिङ्गे प्रथमाविभक्तौ त्रिषु वचनेषु अभ्यासः।<br>चित्राधारितरिक्तस्थानपूर्तिः – तालः, भल्लूकः इत्यादिचित्राणां बालाः नामलेखनं करिष्यन्ति।<br>पुनरावलोकनम्- वर्णमालायाः अभ्यासः। | • पुल्लिङ्गशब्दान् छात्राः जानीयुः, एतदर्थं शिक्षकः गतिविध्याधारितं शिक्षणं कुर्यात् ।<br>• संज्ञासर्वनामशब्दानां परिचयः प्रदास्यति।<br>• वर्णसंयोजने वर्णविच्छेदे छात्रान् निपुणत्वं विधास्यति। | • पुल्लिङ्गशब्दान् सर्वनामशब्दान् जानन्ति।<br>• वर्णनिर्माणविधिं जानन्ति।<br>• संज्ञा–सर्वनामशब्दानाम् पृथक्करणे नैपुण्यं प्राप्नुवन्ति। | वर्णमालागीतम्-2 यूट्यूब–सहायतया शिक्षणीयम्।<br>कमलं विकसति सुन्दर–सरसि.....<br>• http://youtu.be/vij97ix2JwY;<br>https://youtu.be/MIIqt8CiRQis; |

| | | | | |
|---|---|---|---|---|
| शब्दरूपपरिचयः क्रियापदपरियः | शब्दरूपाणि – बालकः, रामः, लता, जल, अभिनयमाध्यमेन वाक्यरचनाभ्यासः, अभ्यासकार्यम्। | • क्रियापदपरिचयः - अस्, कृ, खेल्, पठ्, धाव्, हस् इत्यादीनां धातूनां लट्लकारे प्रथमपुरुषे त्रिषु वचनेषु अभ्यासः। | • धातुरूपाणि त्रिषु वचनेषु जानन्ति। वाक्यनिर्माणे दक्षः भवति। | • अकारान्त–आकारान्ताः विविध धातुरूपाणां बोधनाय विविधक्रियानां गतिविधिमाध्यमेन बोधो कारयिष्यति। पुंस्त्रीनपुंसकलिङ्गशब्दानाम् उदाहरणेन बोधः कारयेत्। यथा–नायकः, रजकः, कपोतः, कन्या वन, धन, इत्यादयः। |
| शब्दपरिचयः - **II** | चित्रमाध्यमेन शब्दपरिचयः - दोला, घटिका, चालिका, चटका इत्यादीनां प्रथमाविभक्तौ त्रिषु वचनेषु अभ्यासः। | आकारान्ताः विविध–स्त्रीलिङ्गशब्दानाम् उदाहरणमाध्यमेन बोधः कारयिष्यति। यथा– वाचिका, कन्या, शिक्षिका इत्यादि। | स्त्रीलिङ्गशब्दरूपाणि सर्वनामशब्दरूपाणि तथा जानन्ति। | अभिनयमाध्यमेन सर्वनामपरिचयः – एतत्, तत्, किम् इति एतेषां स्त्रीलिङ्गे प्रथमाविभक्तौ त्रिषु वचनेषु अभ्यासः। |
| शब्दपरिचयः- **III** | अभिनयमाध्यमेन सर्वनामपरिचयः-तत्, एतत्, किम् इति नपुंसकलिङ्गे प्रथमाविभक्तौ त्रिषु वचनेषु अभ्यासः। धातुरूपाणि वाक्यरचनाभ्यासः, अभ्यासकार्यम्। | नपुंसकलिङ्गशब्दान् छात्राः जानीयुः, एतदर्थं शिक्षकः गतिविध्याधारितं शिक्षणं कुर्यात्। | नपुंसकलिङ्गशब्द-रूपाणि सर्वनाम-शब्दरूपाणि अव्ययशब्दान् च ज्ञात्वा प्रयोगे समर्थाः भवन्ति। | गतिविधयः – अस्ति, नास्ति, आम्, न, किम् प्रश्नोत्तराभ्यासः। चित्रमाध्यमेन शब्दपरिचयः - खनित्रम्, सूत्रम्, यानम्, करवस्त्रम्, फलम्, भवनम् इत्यादीनां प्रथमाविभक्तौ त्रिषु वचनेषु अभ्यासः। अभिनयमाध्यमेन क्रियापदपरिचयः - पठ् (लट्, लृट्, लङ्- लकारेषु) |
| चित्राधारिता वाक्यरचना | शिक्षकः चित्राधारिता वाक्यरचनायाः अभ्यासं कारयेत्। | तार्किक–चिन्तनं समस्या–समाधानम् कौशलान् शिक्षयेत्। | भाषायां लेखनकौशलस्य अभिवृद्धिः भवति। | क्रीडाङ्गणे गत्वा प्रकृत्यादिकं कमप्येकं विषयमाधृत्य छात्राः एकम्– एकं वाक्यं रचयित्वा वदेयुः। |

| | | | | |
|---|---|---|---|---|
| विद्यालयः | आदर्शवाचनम्, अनुवाचनम्, शब्दार्थज्ञानम्, अभ्यासकार्यम्। गतिविधयः –‘मम परिचयः’ इति विषये मम नाम ----। भवतः/ भवत्याः/ विद्यालयस्य/निवासस्थानस्य/जनकस्य नाम इत्यादीनि वाक्यानि वदेयुः। | विद्यार्थिनः भाषायाः वाचनकौशले दक्षाः भवेयुः। | स्वकीयं परिचयं विद्यालयस्य च परिचयं संस्कृतभाषायां वक्तुं समर्थाः भवन्ति। | सामूहिक–गतिविधिः –यथा– मम माता देवता, चटका चटका रे चटका यूट्यूब–सहायतया शिक्षणीयम्, अनन्तरं ते स्वयमेव गायने कुशलाः भवन्ति। https://youtu.be/LzzzZDzGlgg https://youtu.be/9AK-VLzJl4Y https://youtu.be/3d-64p0pd04 |
| वृक्षाः | सस्वरगायनम्, शब्दार्थज्ञानम्, अभिनयपूर्वकं कण्ठस्थीकरणम् लयाभ्यासः, अभ्यासकार्यम्। शब्दपरिचयः - इकारान्तः उकारान्तश्च। | छात्राः श्लोकानां शिक्षकानुगुणं सस्वरं श्लोकान् गायेयुः। अनन्तरं कण्ठस्थीकरणं च कुर्युः। | पर्यावरणसंरक्षणे वृक्षाणां महत्त्वं जानन्ति। श्लोकान् स्मरन्ति। | छात्रान् वृक्षरोपणाय शिक्षकः प्रेरयेत्। ग्रीष्मकाले यदा पशु– पक्षिणः आतपात् त्रस्ताः भवन्ति। तदा वृक्षाः एव तेषाम् आश्रयः भवितुं शक्यः। छात्राः एतेन प्रेरणा संगृह्य वृक्षारोपणं कुर्युः। |
| मध्यावधिः पाठ्यक्रमस्य पुनरावृत्तिः। पाठ्यक्रमः 13 सितम्बर 2024 पर्यन्तं पूर्णं कारणीयम्। मध्यावधि-परीक्षा | | | | |
| **पाठपरिचयः** | **विषयवस्तु** | **अधिगम–उद्देश्यानि** | **अधिगमसम्प्राप्तिः** | **गतिविधयः** |
| बकस्य प्रतीकारः | आदर्शवाचनम्, अनुवाचनम्, शब्दार्थज्ञानम्, अभ्यासकार्यम्। तत्समपदानाम् अभ्यासः - सियार-श्रृगालः, कौआ-काकः इत्यादयः। संख्या – 1 तः 20 पर्यन्तम्। | छात्राः तार्किकचिन्तने क्षमाः भवेयुः। | रोचककथामाध्यमेन छात्राः अव्ययशब्दान् जानन्ति। गद्यविधायां पठनकौशलं च प्राप्नुवन्ति। छात्राः मातृभाषायाम् | संख्यागीतम् यूट्यूब–सहायतया शिक्षणीयम्, एकम् एकम् आगच्छ–२। द्वे–द्वे स्वागतम्–२। त्रीणि–त्रीणि उपविश–२। चत्वारि–चत्वारि कुशलं किम्?–२ पञ्च–पञ्च कः विशेषः?–२ षड्–षड् कृपया वद–२ सप्त–सप्त दुग्धं पिब–२ अष्ट– अष्ट पुनर्मिलाम–२ नव– |

<table>
<tr>
<td></td>
<td>एकतः चत्वारि पर्यन्तं त्रिषु लिङ्गेषु अभ्यासः। पञ्चतः आरभ्य सामान्यम्।</td>
<td></td>
<td>अन्यासु भाषासु च संख्यां जानन्ति। तस्य पुनरावर्तनं कारणीयम्</td>
<td>नव नमस्ते–२ दश–दश ओम्–ओम्–२ ॥<br>गतिविधिः– शिक्षकः छात्रैः सह मिलित्वा द्वितीता–तृतीया–चतुर्थी–विभक्ति आधारिता कामपि गतिविधिं सम्पादयेत्। येन छात्राः उल्लिखित–विभक्तीनां सामान्यप्रयोगे दक्षाः भवेयुः।</td>
</tr>
<tr>
<td>सूक्तिस्तबकः</td>
<td>पद्यपाठः, सस्वरगायनम्, शब्दार्थज्ञानम्, /लयाभ्यासः, अभ्यासकार्यम्।</td>
<td>पद्यवाचने समर्थाः भवन्ति।</td>
<td>पद्यविधायां पठनकौशलं च प्राप्नुवन्ति।</td>
<td>गतिविधिद्वारा श्लोकानां स्मरणं करिष्यन्ति।</td>
</tr>
<tr>
<td>क्रीडास्पर्धा</td>
<td>आदर्शवाचनम्, अनुवाचनम्, शब्दार्थज्ञानम्, अभ्यास कार्यम्।<br>• पञ्चमी- षष्ठीविभक्त्योः अभ्यासः।<br>• यथा, रामः-रामात्-रामस्य। सीता-सीतायाः-सीतायाः<br>यथा - रामस्य पुत्रः लवः। लवस्य पिता रामः। उमायाः पतिः शिवः। शिवस्य पत्नी उमा। एवमेव अन्यपदानामपि स्फोरकपत्रमाध्यमेन अभ्यासः कारणीयः।</td>
<td>पञ्चमी–षष्ठीविभक्त्योः त्रिषु लिङ्गेषु शब्दानां प्रयोगे समर्थाः भवेयुः। धातूनां लृट्लकारे रूपाणि ज्ञात्वा वाक्ये प्रयोगं कुर्युः।</td>
<td>कथायाः रसास्वादं कुर्वन्ति। पञ्चमीविभक्तौ षष्ठीविभक्तौ च त्रिषु लिङ्गेषु शब्दानां प्रयोगे समर्थाः भवन्ति। धातूनां लृट्लकारे रूपाणि ज्ञात्वा वाक्ये प्रयोगं कुर्वन्ति।</td>
<td><table>
<tr><td>रामः</td><td></td><td>लवः</td><td>उमा</td><td></td><td>शिवः</td></tr>
<tr><td>शिवः</td><td>पुत्रः</td><td>गणेशः</td><td>सीता</td><td>पति</td><td>रामः</td></tr>
<tr><td>दुष्यन्तः</td><td></td><td>भरतः</td><td>देवकी</td><td></td><td>वसुदे</td></tr>
<tr><td>वसुदेवः</td><td></td><td>कृष्णः</td><td>कैकेयी</td><td></td><td>दशर</td></tr>
<tr><td>दशरथः</td><td>पिता</td><td>रामः</td><td>गान्धारी</td><td>पत्नी</td><td>धृतरा</td></tr>
<tr><td>रावणः</td><td></td><td>मेघनादः</td><td>मन्दोदरी</td><td></td><td>रावण</td></tr>
</table>
शिक्षकः छात्रान् पृथक् पृथक् पित्रा सह पुत्रेण सह च सम्बध्य इमान्शब्दान् अन्यानपि शब्दान् पृच्छेत्।।<br>• लृट्लकारे वाक्यप्रयोगः परिवर्तनाभ्यासश्च<br>यथा - पठति-पठिष्यति। वदति-वदिष्यति। चलति-</td>
</tr>
</table>

| | | | | |
|---|---|---|---|---|
| | अव्ययानि – अपि, च, एव, वा, न, पुनः | | | चलिष्यति। छात्रः हसति - छात्रः हसिष्यति। बालकः पठति - बालकः पठिष्यति। एवमेव अन्यवाक्यानाम् अभ्यासः कारणीयः। |
| दशमः त्वमसि | •आदर्शवाचनम्, अनुवाचनम्, शब्दार्थज्ञानम्, अभ्यासकार्यम्। एकपदेन पूर्णवाक्येन प्रश्नानाम् अभ्यासः कारणीयः। बहुविकल्पात्मक–प्रश्नानां चर्चा छात्रैः सह करणीया। | छात्राः तार्किकचिन्तने क्षमाः भवेयुः। समस्यासमाधान–कौशले दक्षाः भवेयुः। | समस्यासमाधानकौशले दक्षाः भवन्ति। तार्किक–चिन्तने दक्षाः भवन्ति। | शिक्षकः समस्यासमाधानकौशलम् आधृत्य गतिविधिमेकं सम्पादयेत्। |
| विमानयानं रचयाम | सस्वरगायनम्, शब्दार्थज्ञानम्, अभिनयपूर्वकं कण्ठस्थीकरणम्/लयाभ्यासः, अभ्यासकार्यम्। लङ्लकारे परिवर्तनाभ्यासः वाक्यप्रयोगश्च। पठति-अपठत्, लिखति-अलिखत्, गच्छति-अगच्छत्। बालकः गृहं गच्छति। - बालकः गृहं अगच्छत्। | कण्ठस्थीकरणे दक्षाः भवेयुः। | सस्वरगायनपूर्वकं पद्यपाठे समर्थाः भवन्ति। इकारान्तस्य उकारान्तस्य च शब्दानां प्रयोगः पठ्-लिख्-प्रभृतिक्रियारूपैः सह कर्तुं समर्थाः भवन्ति। | समूहाधारित–गतिविधिः– छात्राः अपशिष्ट–कर्गदेन विमानं रचयेयुः। पाठे आगतानि अव्ययपदानि प्रत्येकं विमाने समूहानुसारं सर्वे छात्राः लिखेयुः। |

| | | | | |
|---|---|---|---|---|
| अहह आः च | •आदर्शवाचनम्, अनुवाचनम्, शब्दार्थज्ञानम्, अभ्यासकार्यम्। एकपदेन पूर्णवाक्येन प्रश्नानाम् अभ्यासः कारणीयः। बहुविकल्पात्मक–प्रश्नानां चर्चा छात्रैः सह करणीया। | छात्राः तार्किकचिन्तने क्षमाः भवेयुः। समस्यासमाधान–कौशले दक्षाः भवेयुः। | समस्यासमाधानकौशले दक्षाः भवन्ति। तार्किक–चिन्तने दक्षाः भवन्ति। | शिक्षकः समस्यासमाधानकौशलम् आधृत्य गतिविधिमेकं सम्पादयेत्। |

- पाठ्यक्रमः 31जनवरी 2025 पर्यन्तं पूर्णं कारणीयम्।
- वार्षिकपरीक्षादृष्ट्या सकलपाठ्यक्रमस्य पुनरावृत्तिः।
- वार्षिकमूल्याङ्कनं सकलपाठ्यक्रमात् भविष्यति।

वार्षिक-परीक्षा